[५९१] हृदयाच्चालुरन्यतरस्याम्। (म. भा. २.३९९)

हृदयालुः, हृदयी, हृदयिकः, [1]हृदयवान्।

[५९२] शीतोष्ण[2]तृप्रेभ्यस्तन्न सहत इत्यालुच् वक्तव्यः। (म. भा. २.३९९)

शीतं न सहते शीतालुः। उष्णालुः। [3]तृप्रालुः।

[५९३] तन्न सहत इति हिमाच्चेलुः। (म.भा.२.३९९)

हिमं न सहते [4]हिमेलुः।

[५९४] बलादूलच्। (म.भा. २.३९९)

बलं न सहते बलूलः।

[५९५] वातात् समूहे च। (म.भा.२.३९९)

[५९६[ वातं न सहत इति च।

वातानां समूहः, वातं न सहते इति वा वातूलः।

[५९७] पर्वमरुद्भ्यां तन् वक्तव्यः। (म.भा.२.४००)

'पर्वतः' (मै.सं ४.१२.५)। मरुत्तः।

[५९८] अर्थात्तदभाव इनिर्वक्तव्यः।

अर्थी। [5]तदभावे इत्येव, अर्थवान्। तदेतत् [6]सर्वं बहुलग्रहणेन सम्पद्यते ॥

## ऊर्णाया युस्। (१२३/१९२९)

ऊर्णाशब्दाद् युस् प्रत्ययो भवति मत्वर्थे। सकारः पदसञ्ज्ञार्थः। ऊर्णा अस्य विद्यते ऊर्णायुः (वा.सं. १३.५०)। केचिच् छन्दोग्रहणमनुवर्तयन्ति ॥

## वाचो ग्मिनिः। (१२४/१९३०)

वाच्शब्दात् ग्मिनिः प्रत्ययो भवति मत्वर्थे। वाग्मी, वाग्मिनौ, वाग्मिनः ॥

## आलजाटचौ बहुभाषिणि। (१२५/१९३१)

वाच्शब्दात् प्रथमासमर्थाद् आलच् आटच् इत्येतौ प्रत्ययौ भवतो मत्वर्थे बहुभाषिणि अभिधेये। ग्मिने[7]रपवादः। वाचालः। वाचाटः।

[५९९] कुत्सित इति वक्तव्यम्। (म.भा.२.४००)

यो हि सम्यग् बहु भाषते वाग्मीत्येव स भवति ॥

---

1. हृदयावी ङ. 2. °तिग्मेभ्यः क. 3. तिग्मालुः क. 4. हिमालुः क. 5. वाक्यमिदं नास्ति फ. 6. सर्वं नास्ति ब. क. फ. ग. 7. अपवादौ क.